F.Y.
July 2017

Reg. No. ......................................

Name ..........................................

**805**

# First Year Higher Secondary Improvement Examination

**Part - II**

**SANSKRIT**

Maximum : 80 Scores

Time : **2½** Hours
Cool off time : **15** Minutes

***General Instructions to Candidates :***

- There is a 'Cool off time' of 15 minutes in addition to the writing time of 2½ hrs.
- You are neither allowed to write your answers nor to discuss anything with others during the 'cool off time'.
- Read the questions carefully before answering.
- All questions are compulsory and only internal choice is allowed.
- When you select a question, all the sub-questions must be answered from the same question itself.
- Electronic devices except nonprogrammable calculators are not allowed in the Examination Hall.

**निर्देशा: –**

सर्वे प्रश्ना: समाधेया: ।

प्रश्नान् प्रश्ननिर्देशान् च सावधानतया पठित्वा उत्तरयत ।

प्रश्नानां वाचनाय 15 निमेषा: कल्पिता: ।

1. **क)** भवन्ति नम्रास्तरव: फलागमै –

नवाम्बुभिर्दूरविलम्बिनो घना: ।

अनुद्धता: सत्पुरुषा: समृद्धिभि:

स्वभाव एवैष परोपकारिणाम् ।।

**ख)** आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ।।

**ग)** साहित्यसङ्गीतकलाविहीन:
साक्षात्पशु: पुच्छविषाणहीन: ।
तृणं नखादन्नपि जीवमान -
स्तद्भागधेयं परमं पशूनाम् ।।

i) भिन्नवृत्तयुक्तं श्लोकम् उद्धृत्य लिखत । **(3)**

ii) उद्धृतस्य श्लोकस्य वृत्तं सलक्षणं लिखत । **(3)**

iii) एवैष इति पदं कस्मिन् गणे अन्तर्भवति । (भगण:, मगण:, तगण:) **(1)**

**2.** अस्य पापस्य तव कलत्रपुत्रादय: फलभाज: किम् ।

**क)** रत्नाकरस्य तस्य भार्याया: च मध्ये प्रवृत्तं सम्भाषणं सम्भाव्य लिखत । **(6)**

रत्नाकर: - किञ्चित् प्रष्टव्यम् ।

भार्या - ................................... ।

रत्नाकर: - तत्र सप्तर्षय: आगतवन्त: ।

भार्या - ................................... ।

रत्नाकर: - पापस्य फलं केषाम् उपरि इति अपृच्छत् ।

भार्या - ................................... ।

**ख)** पदच्छेदं कुरुत । उदा.- कविरलिखत् - कवि: + अलिखत् ।

मुनिरपृच्छत् - ........... + .......... । **(1)**

**ग)** रत्नाकर: क: ? (सप्तर्षि:, निषाद:, राजा) **(1)**

**3.** श्लोकस्यास्य गद्यक्रमं पूरयत । **(4)**

नहि देहिनि शोभनं भवे -
च्चरितार्थे सति जीवितं पुन: ।
सुतरां नटने समापिते
स च रङ्गाद्विरमेत् कुशीलव: ।।

**गद्यक्रम:** - देहिनि .......... सति पुन: जीवितम् नहि ........... भवेत् । नटने सुतराम् ......... सति स कुशीलव: च ........... विरमेत् ।

**4.** इष्टतम: श्लोक: क इति सकारणं लिखत । **(7)**

**क)** विशिखा निशिता विरम्यतां
क्षतमेयात् स्तिमितं न मे मन: ।
पुरतो भ्रम लोकचक्र! मां
त्यज सीतामिह तां हतामहो ।।

**ख)** इयमस्तु नतिर्ममान्तिमा
दिनसाम्राज्यपते! दिवस्पते! ।
कनकांशुशरौघधारिणे
भवते दुष्प्रसहप्रदीप्तये ।।

**ग)** इह सायमुषस्सु चान्वहं

वयमाना शबलांशुकानि या ।

छदतेऽम्बरवेश्मतोरणं

प्रियसन्ध्ये! भवतीं नमामि ताम् ।।

5. माहेश्वरसूत्राणि क्रमीकुरुत । **(4)**

ऐ औ च् । अ इ उ ण् । ए ओ ङ् । ऋ ऌ क् ।

6. **क)** स्वदिनचर्यां लिखत । आयुर्वेददिशां स्वीकरोतु । **(7)**

(**सूचिका:** – प्रात: पञ्चवादने उत्तिष्ठति, व्यायामं करोति, पठनं करोति, निद्रां करोति ।)

**ख)** अहं रात्रौ ........... (10.30) वादने निद्रां करोमि । **(1)**

7. शब्दादिभि: पञ्चभि: नीत्वा कुरङ्गमातङ्गपतङ्गमीनभृङ्गा: स्वगुणेन सम्बद्ध्य पञ्चत्वम् आपु: । पञ्चभि: अञ्चितेन नरेण पुन: किं कर्तुं शक्यते ।

**क)** खण्डिकां पठित्वा क्त्वान्त – ल्यबन्त – तुमुन्नन्त पदानि चित्वा लिखत । **(3)**

i) क्त्वान्तपदं ............................

ii) ल्यबन्तपदं ............................

iii) तुमुन्नन्तपदं ............................

**ख)** एतदाशययुक्तं श्लोकं चित्वा लिखत । **(2)**

i) अकृत्वा शत्रुसंहारम् अगत्वाखिलभूश्रियम् ।

राजाहमिति शब्दान्नो राजा भवितुमर्हति ।।

ii) शब्दादिभि: पञ्चभिरेव पञ्च पञ्चत्वमापु: स्वगुणेन बद्धा: ।

कुरङ्गमातङ्गपतङ्गमीनभृङ्गा: नर: पञ्चभिरञ्चित: किम् ।।

8. **द्वौ** रुपकसङ्केतौ अधिकृत्य ससन्दर्भं लिखत । **(8)**

**क)** नेपथ्यम्

**ख)** आत्मगतम्

**ग)** प्रकाशम्

9. **क)** उचितं पदमुपयुज्य पूरयत । **(4)**

विवादेन .......... स: त्वया .......... श्रुत: अशेषं तथाविध: अस्तु मम मन: ........ भावैकरसम् स्थितम् कामवृत्ति: वचनीयं ............ ईक्षते ।

(यथा, न, अलं, अत्र)

**ख)** उदाहरणानुसारं वाक्यं परिवर्त्य लिखत । **(2)**

उदा : गानं श्रृणोतु । गानं श्रृणोति ।

i) भवान् गच्छतु । ............. ।

ii) मोदकं खादतु । ............... ।

10. ''सखे कुत्रासि? जलमाहर्तुं गतं चिरायितं भवन्तं प्रति व्याकुलो गुरुवर: ।'' देवशर्मण: वाण्या प्रबुद्धो धीरदास: प्रोवाच – ''किं स्मरति भवान्? बाल्ये वयं चत्वार: मित्रत्वेन वसाम: स्म । तदानीं ग्राममागतं पण्डितवर्यं वीक्ष्य तत्समाना: भवेम इति निश्चितवन्तश्च । तदर्थं कन्याकुब्जमेव गन्तव्यमिति निर्णीय सोत्साहम् अत्र आगता: ।

(दु:खितो, दृष्ट्वा, वाचा, मित्र)

**क)** खण्डिकायां रेखाङ्कितपदस्य स्थाने कोष्टकात् समानार्थपदमुपयुज्य लिखत । **(4)**

**ख)** कुत्र ते आगता:? **(2)**

**ग)** पदच्छेदं कुरुत । उदा. – ग्रन्थश्च – ग्रन्थ: + च ।

निश्चितवन्तश्च – ........ + ....... । **(1)**

11. भाषान्तरीकरणं कुरुत । **(6)**

मम कर्मधीरा: युवका: यूयं सर्वे महान्ति कार्याणि कर्तुमागता: इति विश्वास: युष्मासु अवश्यं भवेत् । शुनकस्य भषणं श्रुत्वा मा भैष्ट । गगने विद्यमानेन विद्युत: प्रभावेनापि चकिता: न भवेत् ।

12. उपमालङ्कारं सलक्षणं निरुपयत । **(5)**

**अथवा**

उत्प्रेक्षालङ्कारं सलक्षणं निरुपयत । **(5)**

**13.** यथोचितं योजयत । **(5)**

| क विभागः | | ख विभागः | |
|---|---|---|---|
| क) | कर्मणैव हि संसिद्धिः । | 1) | पार्वती । |
| ख) | पुरतो भ्रम लोकचक्र । | 2) | पाणिनिः । |
| ग) | शब्दाह्वयं ज्योतिः । | 3) | कर्णः । |
| घ) | हुतं च दत्तं च तथैव तिष्ठति । | 4) | वसिष्ठः । |
| ङ) | भावैकरसं मनः । | 5) | सीता । |

Sanskrit - 805
HSE I July 2017

# Answer Key

| Sl No | Value Points | Split Score | Total |
|---|---|---|---|
| 1 क | श्लोकलेखनम्। | 3 | 3 |
| 1 ख | वंशस्थम्, लक्षणलेखनम्, विशदीकरणम् च। | 2,1 | 3 |
| 1 ग | तगणः। | 1 | 1 |
| 2 क | उचितलेखनम्। | 2,2,2 | 6 |
| 2 ख | मुनिः + अपृच्छत्। | 1 | 1 |
| 2 ग | निषादः। | 1 | 1 |
| 3 | चरितार्थे , शोभनं , समापिते , रङ्गात् । | 1,1,1,1 | 4 |
| 4 | श्लोकलेखनम्,कारणलेखनम्, समर्थनम् च। | 3,2,2 | 7 |
| 5 | अ इ उ ण् , ऋ लृ क् , ए ओ ङ् , ऐ औ च्। | 4 | 4 |
| 6 क | समयक्रमः, दिनचर्यायाः अवबोधः, उचितलेखनम् च। | 3 , 2, 2 | 7 |
| 6 ख | सार्धदशवादने। | 1 | 1 |
| 7 क | नीत्वा , सम्बद्ध्य , कर्तुं । | 1, 1, 1 | 3 |
| 7 ख | शब्दादिभिः.............। | 2 | 2 |
| 8 | द्वित्रिवाक्यैः लेखनम् । | 4, 4 | 8 |
| 9 क | अलम्, यथा, अत्र, न । | 1, 1, 1,1 | 4 |
| 9 ख | भवान् गच्छति। मोदकं खादति। | 1,1 | 2 |
| 10 क | मित्र , दुःखितो , वाचा , दृष्ट्वा । | 1,1,1,1 | 4 |
| 10 ख | कन्याकुब्जं। | 2 | 2 |
| 10 ग | निश्चितवन्तः + च । | 1 | 1 |
| 11 | उचिताशयानुवादः। | 6 | 6 |
| 12 | लक्षणलेखनम्, विशदीकरणम् च। | 3, 2 | 5 |
| 13 | वसिष्ठः, सीता, पाणिनिः, कर्णः, पार्वती,। | 1,1,1,1,1 | 5 |
| | आहत्याङ्काः | | **73** |

1/1